संस्कृत-वार्ता:

05.10.2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· मुख्य-निर्वाचन-आयुक्तस्य ज्ञानेश-कुमारस्य नेतृत्वे अद्य आयोगस्य दलेन गुप्तधनस्य, मद्यस्य, मादकद्रव्याणां च समाह्वानं निवारयितुं विभिन्न-प्रवर्तन-संस्थाभिः सह चर्चा कृता।

· प्रधानमन्त्री नरेन्द्रमोदी पश्चिमबङ्गालराज्यस्य दार्जीलिङ्गजनपदे सञ्जातायां विंशति जनानां मृत्युघटनायां दुःखं प्रकटितवान्।

· नेपाल देशे सञ्जाते प्रचण्ड-वृष्ट्या भूस्खलनेन सप्तचत्वारिंशत् जनाः मृताः।

· विश्व-पैरा-एथलेटिक्स्-चैम्पियन्शिप्-प्रतियोगितायां भारतस्य पैरा-क्रीडकाः उत्कृष्ट प्रदर्शनेन अष्टादश-पदकानि समर्जितवन्तः।

· क्रिकेट्-क्रीडायां, अद्य आई.सी.सी-महिलानां एकदिवसीय क्रिकेट विश्वचषक स्पर्धायां कोलम्बो-नगरे भारत-पाकिस्तान देशयोः मध्ये स्पर्धा सम्प्रति प्रचलति।

<u>बिहार- निर्वाचन-आयोग</u>

बिहारराज्ये स्वतन्त्रं, निष्पक्षं, शान्तियुतं च विधानसभा-निर्वाचनं सुनिश्चेतुं निर्वाचन-आयोगेन अद्य पटना-नगरे विभिन्नानां प्रवर्तन-संस्थानाम् अधिकारिभिः, आरक्षकाधिकारिभिः, केन्द्रीय-आरक्षकाधिकारिभिः, वरिष्ठ-प्रशासनिक-अधिकारिभिः च सह उपवेशनं कृतम्। मुख्य-निर्वाचन-आयुक्तस्य ज्ञानेश-कुमारस्य नेतृत्वे आयोगस्य दलेन गुप्तधनस्य, मद्यस्य, मादकद्रव्याणां च समाह्वानं निवारयितुं विभिन्न-प्रवर्तन-संस्थाभिः सह चर्चा कृता। आयकरविभागस्य, प्रवर्तन-निदेशालयस्य, सीमाशुल्कस्य, नार्कोटिक्स्-कण्ट्रोल्-ब्यूरो इत्यस्य, बैङ्क्-इत्यस्य, रेल्-विभागस्य, अन्येषां प्रवर्तन-संस्थानां च अधिकारिणः अस्मिन् सभायां उपस्थिताः आसन्। निर्वाचन-आयोगेन सुरक्षायाः, विधि-व्यवस्थायाः, अन्ताराष्ट्रियसीमायां सीमापारस्य सुरक्षायाः च अपि मूल्याङ्कनं कृतम्, बिहार-राज्ये राज्य-आरक्षकस्य तथा केन्द्रीय-सशस्त्र-अर्धसैनिक-बलानां नोडल्-अधिकारिभिः सह समन्वयस्य आकलनं कृतम्।

चर्चायाः विचार-विमर्शस्य च अन्तिमे चरणे, मुख्य-निर्वाचन-आयुक्तः बिहारस्य मुख्यसचिवेन, आरक्षि-महानिदेशकेन, मुख्य-निर्वाचन-अधिकारिणा च सह उच्च-स्तरीय-समीक्षा-सभाम् आयोजयिष्यति, येन विभिन्नेषु विषयेषु, विधानसभा-निर्वाचनस्य सज्जतायाः मूल्याङ्कनं भविष्यति।

दार्जिलिंग वर्षा

बङ्गालराज्यस्य दार्जिलिंग जनपदे सञ्जाते भूस्खलनात् अतिवृष्टिकारणात् च विंशत्यधिकाः जनाः मृताः । ह्यः सायंकालात् गोरखा क्षेत्रीयप्रशासनिक क्षेत्रे निरन्तरं वर्षा भूस्खलनं च भवति। प्रचण्डवृष्टिकारणात् मिरिक्, कुर्सोङ्ग, रांगभांग, पुल बाज़ार चेति क्षेत्राणि प्रभावितानि जातानि। कालिम्पोङ्ग पर्वतीय जनपदं समेत्य तत्रत्य अन्येषु भागेषु च तीव्रवृष्ट्या भूस्खलनेन च हानिः अभवत्। राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सीपी राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी च पश्चिमबङ्गालराज्यस्य दार्जीलिङ्गजनपदे सञ्जातायां घटनायामालक्ष्य दुःखं प्रकटितवन्तः। केन्द्रीय गृहमन्त्री अमितशाहः अपि दार्जीलिङ्ग जनपदे सञ्जातायां घटनायां शोकं प्रकटितवान् ।

नेपाल

नेपाल देशे सञ्जाते प्रचण्ड-वृष्ट्या भूस्खलनेन च मार्गाः अवरूद्धाः सञ्जाताः। शुक्रवासरात् अधुना यावत् सप्तचत्वारिंशत् जनाः मृताः इति अद्य अधिकारिणः सूचितवन्तः। भूस्खलनेन अति प्रभाविते इलाम जनपदे सप्तत्रिंशत् जनाः मृताः, लुप्तजनानाम् अन्वेषणं, उद्धारकार्यं च सजवं प्रचलति। राष्ट्रीय विमानयानानां सेवाऽपि बाधिता। परञ्च अन्तर्राष्ट्रीयविमानयानानां सेवाः सामान्यरूपेण प्रचलन्ति। प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् नेपालदेशे प्रचण्डवृष्ट्या जीवनस्य, सम्पत्तेश्च हानिः दुःखप्रदः अस्ति। एकस्मिन् सामाजिकान्तर्जालीय सन्देश माध्यमेन श्री मोदी प्रतिपादितवान् यत् भारतं अस्मिन् कठिनसमये नेपाल-देशस्य जनानां, सर्वकारस्य च सह वर्तते ।

## मनसुख माण्डवीयः

युवप्रकरणानां क्रीडा-मन्त्री डा. मनसुख माण्डवीयः अद्य विश्व-शिक्षक-दिवसस्य अवसरे नवदिल्ल्यां साईकिल इति द्विचक्रिका-विशेष-संस्करणे फिट्-इण्डिया-रविवासरेषु भागम् अगृह्णात्। कार्यक्रमावधौ, डा. माण्डवीयः मेजर् ध्यानचन्द्-क्रीडाङ्गणात् इण्डिया-गेट इत्यमुं परितः स्थलेषु साइक्लिंग-यात्रायां शतशः शिक्षकेभ्यः, छात्रेभ्यः, नागरिकेभ्यः च सह भागं भजितवान् । जनसमूहं सम्बोधयन्, मन्त्री सूचितवान् यत् अद्य प्रायः सार्द्ध दशसहस्र तोप्यधिकेषु भिन्नस्थानेषु फिट् इण्डिया रविवासरेषु द्वि-चक्रिका यात्रायाः आयोजनम् अभवत्।

## नामचिक-कोल-खण्डः

कृष्णाङ्गार-खनन-मन्त्री जी. किशन रेड्डी-वर्यः श्वः अरुणाचलप्रदेशे प्रथमस्य वाणिज्यिक-अङ्गार-खनन नामचिक्-नामफुक्-अङ्गारखण्डस्य भूमि-पूजनं करिष्यति। खननमन्त्रालयेन सूचितं यत्, राज्ये प्रतिवर्षं शतकोटिरूप्यकाणां राजस्वानाम् उत्पादनं भविष्यतीति, येन यूनां कृते वृत्यावसरस्य, समृद्धेः च सृजनं भविष्यति। मन्त्रालयः सूचितवान् यत् एतत् उपक्रमं प्रधानमन्त्रिण: नरेन्द्रमोदिन: ई. ए. एस्. टी. इति पूर्वं-सशक्तीकरणस्य, अधिनियमस्य, सुदृढीकरणस्य, परिवर्तनस्य दूरदृष्टिं प्रवर्तयति इति।

## ऋतु विज्ञान विभागेन

भारतीय ऋतु विज्ञान विभागेन अत्यन्तं प्रचण्डवृष्टेः अनुमानं प्रकटितम्। बिहार, पश्चिम बङ्गाल, सिक्किम राज्यान् समेत्य श्वः यावत् तत्रत्य केषुचित् अन्येषु स्थानेषु प्रचण्डवृष्टिः भवितुं शक्नोति। ऋतु विभागेन उक्तं यत् अरुणाचलप्रदेशे, असम, मेघालय, नागालैण्ड, मणिपुर, मिजोरम, त्रिपुरा चेत्येतेषु क्षेत्रेषु मध्यमवृष्टिः समेत्य केषुचित् स्थानेषु प्रचण्डवृष्टिः भवितुं शक्नोति। श्वः तमिलनाडु, केरल, माहे चेत्येतेषु भागेषु स्थितिः यथावदेव भविष्यति। विभागेन जम्मू-कश्मीर, लद्दाख, पश्चिमराजस्थान, हिमाचलप्रदेश, पञ्जाबादि राज्येषु सहैव देशस्य उत्तरभागेषु च भूरिवृष्टेः संभावना प्रकटिता। विभागेन उक्तं यत् उत्तरपश्चिमभारते आगामिषु द्वि-त्रि दिवसेषु वर्षायाः गतिः संवर्धयिष्यति।

संयुक्तराज्य ब्रिटेन प्रधानमन्त्री

ब्रिटेन देशस्य प्रधानमन्त्री कीर् स्टार्मरः अस्य मासस्य अष्टदिनाङ्कात् आरभ्य द्विदिवसीय भारतस्य आधिकारिकयात्रायाम् आगमिष्यति। इदं प्रधानमन्त्रिणः स्टार्मर वर्यस्य भारतस्य प्रथमं आधिकारिकं भ्रमणम् भविष्यति। विदेशमन्त्रालयेन उक्तं यत्, अक्टोबर मासस्य नवमे दिनाङ्के मुम्बई-नगरे प्रधानमन्त्री नरेन्द्रमोदी, तस्य यूके-समकक्षी च भारत-यूके व्यापक-सामरिक-सहभागित्वस्य अन्तर्गतस्य विविधक्षेत्रेषु प्रगत्याः समीक्षाः विधास्यन्ति, यत् पञ्चत्रिंशोत्तर द्विसहस्रतम वर्षस्य दृष्ट्याः प्रारूपम् अस्ति। इदं व्यापार-निवेशः, प्रौद्योगिकी-नवान्वेषणम्, रक्षा-सुरक्षा, जलवायु-ऊर्जा, स्वास्थ्यं, शिक्षा, जनसम्पर्कः इत्यादिषु प्रमुखस्तम्भेषु कार्यक्रमाणां उपक्रमाणां च केन्द्रीकृतं कालबद्धं च दश-वर्षीयम् कार्ययोजना अस्ति। प्रधानमन्त्री मोदी, प्रधानमन्त्री स्टार्मर् च मुम्बई-नगरे वैश्विक-फिन्टॅक्-उत्सवस्य षष्ठ-संस्करणे भागं गृह्य मुख्यभाषणं करिष्यतः।

विश्व-पारा-एथलेटिक्स्-

अद्य नवदिल्ल्यां समाप्यमाने विश्व-पैरा-एथलेटिक्स्-चैम्पियन्शिप्-प्रतियोगितायां भारतस्य पैरा-क्रीडकाः उत्कृष्ट प्रदर्शनेन पदकानि समर्जितवन्तः। भारतं अद्यपर्यन्तं षट् स्वर्णपदकैः सह अष्टादश पदकं प्राप्नोत्, येषु एकता भयानः ह्यः एफ्-एक पञ्चाशत् क्लब्-थ्रो इत्येतस्मिन् वर्गे अष्टादशतमं पदकविजेतृ अभवत्।

क्रिकेट्

क्रिकेट्-क्रीडायां, अद्य आई.सी.सी-महिलानां एकदिवसीय क्रिकेट विश्वचषक स्पर्धायां कोलम्बो-नगरे भारत-पाकिस्तान देशयोः मध्ये स्पर्धा सम्प्रति प्रचलति। पाकिस्तान्-दलेन पणकं विजित्य प्रथमं क्षेत्ररक्षणं चितम्।

।। इति वार्ता ।।